# केन्द्रीयसंस्कृतविश्वविद्यालयः

## श्री राजीवगान्धीपरिसरः शृंगेरी

दिनांकः03/05/2024

## सूचना

मान्याः विद्वांसः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य शृङ्गेरीस्थः श्रीराजीवगान्धीपरिसरः नानाप्रकारैः पारम्परिकशास्त्राणां संरक्षणे प्रसारणे च बद्धदीक्षः प्रतिवर्षं शास्त्रीयगूढतत्त्वनिरूपकशोधनिबन्धैः विलसन्तीं वाक्यार्थभारतीनाम्नीं शोधपत्रिकां (UGC carelisted and Peer reviewed journal) प्रकाशयति । इदानीं २०२३-२४ शैक्षिकवर्षस्य अङ्कः अचिरादेव प्रकाशयिष्यते । तदर्थं संस्कृतभाषानिबद्धान् न्यायमीमांसावेदान्तव्याकरणसाहित्यज्यौतिषशिक्षाशास्त्रादिविषयसम्बद्धान् सारगर्भितान् शोधलेखान् विद्वांसः प्रददत्विति अभ्यर्थयामहे ।

सम्पादकाः

वाक्यार्थभारती - २०२३-२४

लेखनसमर्पणाय नियमाः -

- लेखनसमर्पणाय अन्तिमतिथिः 25.05.2024
- लेखः यूनिकोड्-मध्ये टङ्कनीयः
- https://form.csuprogram.co.in/ एतस्मिन् सम्पर्के(Link) टङ्कितः लेखः आरोपणीयः
- लेखे - शोधसारः (Abstract), प्रमुखशब्दाः (Key words), उद्धृतवचनानाम् आकरनिर्देशः, सहायकग्रन्थसूची इत्येते अंशाः अवश्यं भवेयुः
- समितिद्वारा चिता एव लेखाः प्रकाशयिष्यन्ते
- लेखस्य आरोपणाय दत्ते सम्पर्के category of journal इत्यत्र UGC Carelisted and Peer reviewed journal इति पूरयन्तु । Type of journal इत्यत्र वाक्यार्थभारती-वार्षिकी राष्ट्रियशोधपत्रिका (Vakyartha Bharati - Yearly National Research Journal) इति पूरयन्तु ।